# shrI shukra aShTottarashatanAma stotraM

# શ્રીશુક્રાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : shukra aShTottarashatanAma stotraM

File name : shukra108nAmastotra.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Latest update : November 19, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીશુક્રાષ્ટોત્તરશતનામસ્તોત્રમ્

શુક્ર બીજ મન્ત્ર - ૐ દ્રાઁ દ્રીં દ્રૌં સઃ શુક્રાય નમઃ ॥

શુક્રઃ શુચિઃ શુભગુણઃ શુભદઃ શુભલક્ષણઃ ।
શોભનાક્ષઃ શુભ્રરૂપઃ શુદ્ધસ્ફટિકભાસ્વરઃ ॥ ૧॥

દીનાર્તિહારકો દૈત્યગુરુઃ દેવાભિવન્દિતઃ ।
કાવ્યાસક્તઃ કામપાલઃ કવિઃ કળ્યાણદાયકઃ ॥ ૨॥

ભદ્રમૂર્તિર્ભદ્રગુણો ભાર્ગવો ભક્તપાલનઃ ।
ભોગદો ભુવનાધ્યક્ષો ભુક્તિમુક્તિફલપ્રદઃ ॥ ૩॥

ચારુશીલશ્ચારુરૂપશ્ચારુચન્દ્રનિભાનનઃ ।
નિધિર્નિખિલશાસ્ત્રજ્ઞો નીતિવિદ્યાધુરન્ધરઃ ॥ ૪॥

સર્વલક્ષણસમ્પન્નઃ સર્વાપદ્ગુણવર્જિતઃ ।
સમાનાધિકનિર્મુક્તઃ સકલાગમપારગઃ ॥ ૫॥

ભૃગુર્ભોગકરો ભૂમિસુરપાલનતત્પરઃ ।
મનસ્વી માનદો માન્યો માયાતીતો મહાષયઃ ॥ ૬॥

બલિપ્રસન્નોઽભયદો બલી બલપરાક્રમઃ ।
ભવપાશપરિત્યાગો બલિબન્ધવિમોચકઃ ॥ ૭॥

ઘનાશયો ઘનાધ્યક્ષો કમ્બુગ્રીવઃ કળાધરઃ ।
કારુણ્યરસસમ્પૂર્ણઃ કળ્યાણગુણવર્ધનઃ ॥ ૮॥

શ્વેતામ્બરઃ શ્વેતવપુઃ ચતુર્ભુજસમન્વિતઃ ।
અક્ષમાલાધરોઽચિન્ત્યઃ અક્ષીણગુણભાસુરઃ ॥ ૯॥

નક્ષત્રગણસઞ્ચારો નયદો નીતિમાર્ગદઃ ।
વર્ષપ્રદો હૃષીકેશઃ ક્લેશનાશકરઃ કવિઃ ॥ ૧૦॥

ચિન્તિતાર્થપ્રદઃ શાન્તમતિઃ ચિત્તસમાધિકૃત્ ।

આધિવ્યાધિહરો ભૂરિવિક્રમઃ પુણ્યદાયકઃ ॥ ૧૧॥

પુરાણપુરુષઃ પૂજ્યઃ પુરુહૂતાદિસન્નુતઃ ।
અજેયો વિજિતારાતિર્વિવિધાભરણોજ્જ્વલઃ ॥ ૧૨॥

કુન્દપુષ્પપ્રતીકાશો મન્દહાસો મહામતિઃ ।
મુક્તાફલસમાનાભો મુક્તિદો મુનિસન્નુતઃ ॥ ૧૩॥

રત્નસિંહાસનારૂઢો રથસ્થો રજતપ્રભઃ ।
સૂર્યપ્રાગ્દેશસઞ્ચારઃ સુરશત્રુસુહૃત્ કવિઃ ॥ ૧૪॥

તુલાવૃષભરાશીશો દુર્ધરો ધર્મપાલકઃ ।
ભાગ્યદો ભવ્યચારિત્રો ભવપાશવિમોચકઃ ॥ ૧૫॥

ગૌડદેશેશ્વરો ગોપ્તા ગુણી ગુણવિભૂષણઃ ।
જ્યેષ્ઠાનક્ષત્રસમ્ભૂતો જ્યેષ્ઠઃ શ્રેષ્ઠઃ શુચિસ્મિતઃ ॥ ૧૬॥

અપવર્ગપ્રદોઽનન્તઃ સન્તાનફલદાયકઃ ।
સર્વૈશ્વર્યપ્રદઃ સર્વગીર્વાણગણસન્નુતઃ ॥ ૧૭॥

એવં શુક્રગ્રહસ્યૈવ ક્રમાદષ્ટોત્તરં શતમ્ ।
સર્વપાપપ્રશમનમ્ સર્વપુણ્યફલપ્રદમ્ ॥ ૧૮॥

યઃ પઠેચ્છ્રુણુયાદ્વાપિ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૯॥

Provided by Manda Krishna shrikanth mandaksk at gmail.com
Proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca

*shrI shukra aShTottarashatanAma stotraM*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*